# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-3) | **प्रश्नपत्रम्**-५ (New & Old) | **गुणाः** - ७० |
| **विषयः** - पुराणेतिहासः | **कोड**- CC- 2- 3- 5 | **समयः** - २ तः ५ |
| **दिनाङ्कः** - ०८/१२/२०१८ | **सन्दर्भग्रन्थः**- श्रीमद्भागवतमहापुराणे चतुर्थस्कन्धः | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** **१०**

१. विद्यातपोवित्तवपुर्वयः कुलैः सतां गुणैः षड्भिरसत्तमेतरैः ।
स्मृतौ हतायां भृतमानदुर्दशः स्तब्धा न पश्यन्ति हि धाम भूयसाम् ॥

२. त्वमेव भगवन्नेतिच्छिवशक्त्योः सरूपयोः ।
विश्वं सृजसि पास्यत्सि कीडन्नूर्णपटो यथा ॥

३. गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ।
मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ॥

**प्र-२ सतीशिवयोः कथाप्रसङ्गं सविस्तरं लिखत ।** **१०**

**अथवा**

**ध्रुवचरितं वर्णयत ।**

**॥ द्वितीयान्वितिः ॥**

**प्र-३ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** **१०**

१. तितिक्षया करुणया मैत्र्या चाखिलजन्तुषु ।
समत्वेन च सर्वात्मा भगवान् सम्प्रसीदति ॥

२. शान्ताः समदृशः शुद्धाः सर्वभूतानुरञ्जनाः ।
यान्त्यञ्जसाऽच्युतपदमच्युतप्रियबान्धवाः ॥

३. न कामये नाथ तदप्यहं क्वचित् न यत्र युष्मच्चरणाम्बुजासवः ।
महत्तमान्तहृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥

**प्र-४ पृथोः शताश्वमेधान् विवर्ण्य स्वप्रजायै प्रदत्तोपदेशं लिखत ।** **१०**

**अथवा**

**पृथवे सनत्कुमाराणां समुपदेशं वर्ण्यताम् ।**

**॥ तृतीयान्वितिः ॥**

**प्र-५ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । १०**

१. सङ्गमः खलु साधूनामुभयेषां च सम्मतः ।
यत्सम्भाषणसम्प्रश्नः सर्वेषां वितनोति शम् ॥

२. स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
तस्यैवानुग्रहेणान्नं भुञ्जते क्षत्रियादयः ॥

३. क्षणार्धेनापि तुलये न स्वर्गं नापुर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥

**प्र-६ पुरञ्जनोपाख्यानं विवर्ण्यताम् । १०**

**अथवा**

**नारदस्य प्रचेतसोभ्य उपदेशं पूर्वापरसन्दर्भेण लिखत ।**

**॥ चतुर्थान्वितिः ॥**

**प्र-७ दशानां लघूत्तराणि लिखत । १०**

१. वीरभद्रः कुतः प्रकटितो भवति?
२. दक्षयज्ञविध्वंसान्ते देवाः कुत्र गच्छन्ति?
३. ध्रुवस्य गुरुः कः ?
४. ध्रुवः कति मासान्ते भगवत्प्राप्तिं करोति?
५. भगवान् स्वशङ्खेन ध्रुवस्य किमाङ्गं स्पृशति?
६. पृथो अश्वं कः चोरयति?
७. अविज्ञात अर्थात् कः ?
८. पुरञ्जनी अर्थात् का?
९. प्रचेतसः कुत्र तपश्चर्यां कुर्वन्ति?
१०. पृथोः पत्न्याः नाम किम्?
११. पृथोः कस्यां भक्तौ स्थानं विद्यते?
१२. पृथुशब्दस्य पञ्चमी एकवचनम् किम्?
१३. ध्रुवस्य प्रपितामहः कः ?
१४. चतुर्थस्कन्धस्य लीलायाः नाम किम्?
१५. चतुर्थे स्कन्धे कति अध्यायास्सन्ति?

--००--